# Shri Hayagriva Panjaram 1

# श्रीहयग्रीवपञ्जरम् १

## Document Information

Text title : hayagrIvapanjaram 1

File name : hayagrIvapanjaram1.itx

Category : vishhnu, panjara, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Shri Hayagriva Panjaram 1

# श्रीहयग्रीवपञ्जरम् १

(श्रीहयग्रीव मूलमंत्रस्तुतिः)
अस्य कल्पं प्रवक्ष्यामि हयग्रीवस्य पञ्जरम् ।
यस्य विज्ञानमात्रेण वाणी गङ्गेव निःसरेत् ॥ १॥

शुद्धस्फटिकसङ्काशं तुषाराचलसन्निभम् ।
श्वेतपर्वतसङ्काशचन्द्रमण्डलमध्यगम् ॥ २॥

चतुर्भुजमुदाराङ्गं पुण्डरीकायतेक्षणम् ।
शङ्खचक्रधरं देवं किरीटमकुटोज्ज्वलम् ॥ ३॥

कौस्तुभोद्भासितोरस्कं वनमालाविराजितम् ।
पीताम्बरधरं देवं श्रीवत्साङ्कितवक्षसम् ॥ ४॥

मुख्यहस्तद्वयेनैव ज्ञानमुद्राक्षपुस्तकम् ।
धारयन्तं हयग्रीवं ध्यायेदिष्टार्थसिद्धये ॥ ५॥

(नमस्तुभ्यं जगन्नाथ! लक्ष्मीकान्त! परात्पर!।
नमोवाचं पुरश्चक्रे विद्याराजाय विष्णवे॥)
ओङ्काराद्गीथरूपाय ऋग्यजुस्साममूर्तये ।
नमोऽस्तु देवदेवाय वाञ्छितार्थप्रदायिने ॥ ६॥

अज्ञानतिमिरं छिन्धि ज्ञानं चाशु प्रयच्छ मे ।
देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते ॥ ७॥

भूतप्रेतपिशाचादीन् छिन्धि देव जनार्दन ।
ज्वरादीन्निखिलान् रोगान् नाशयाऽऽशु रमापते ॥ ८॥

दारिद्र्यं सकलं छिन्धि कुरु सौभाग्यभाजनम् ।
शत्रून्नाशय मे देव हयशीर्ष नमोऽस्तु ते ॥ ९॥

मेधां प्रज्ञां बलं विद्यां सम्पदं पुत्रपौत्रकम् ।

देहि मे देवदेवेश हयशीर्ष नमोऽस्तु ते ॥ १०॥

कार्कोटकमुखान्सर्पान् विषादीन्विलयं नय ।
अमृतं कुरु मे देव हयशीर्ष नमोऽस्तुते ॥ ११॥

स्त्रीवश्यं जनवश्यं च राजवश्यं परात्परम् ।
कुरु देवाङ्गनावृन्दसेव्यमानपदाम्बुज ॥ १२
हंसायपरमेशायचन्द्रमण्डलवासिने ।
नमो हयोत्तमाङ्गाय वाञ्छितार्थप्रदायिने ॥ १३॥

ऋग्यजुस्सामरूपाय ऋताय महते नमः ।
ऋक्षेशबिन्दुमध्यस्थराजीवासनभाजिने ॥ १४॥

वेदवेदान्तवेद्याय वेदाहरणकर्मणे ।
सत्त्वासत्त्वमहामोहभेदिने ब्रह्मणे नमः ॥ १५॥

प्रज्ञानदायिने नित्यं भजतां भावितात्मनाम् ।
प्रणवोद्गीथवपुषे प्रणतिं प्रतिपादये ॥ १६॥

मन्दारकुन्दस्फटिकमहनीयोरुवर्चसे ।
मनीषाप्रददेवाय महाश्वशिरसे नमः ॥ १७॥

इतिद्वादशमन्त्रेण नमस्कुर्याज्जनार्दनम् ।
प्रातःप्रसन्नवदनं पूर्वाचार्याभिवन्दितम् ॥ १८॥

(प्राची सन्ध्या काचिदन्तर्निशायाः
प्रज्ञादृष्टे रञ्जनश्रीरपूर्वा ।
वक्त्री वेदान्भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः ॥

निर्मलज्ञानसन्दोहं ध्वान्तध्वंसनकर्मठम् ।
नमामि तुरगग्रीवं हरिं सारस्वतप्रदम् ॥)

इति हयग्रीवपञ्जरम् १ सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Hayagriva Panjaram 1*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*